## षष्ठः पाठः

# प्रयत्नो विधेयः



**रविः** — श्याम! एषा अतिगभीरा नदी। नद्याम् अपारं जलम् अस्ति मम च भ्राता मोहनः तरति।

**श्यामः** — नद्यां मोहनः कथं तरति? तरणं तु अतिकठिनम्। सः अपारे जले कथं न मज्जति?

**रविः** — त्वम् उचितं वदसि यत् तरणम् अतिकठिनं, किन्तु मोहनः तरणस्य प्रयत्नं करोति अतः सः न मज्जति। प्रयत्ने कृते कठिनकार्याणि अपि सरलानि भवन्ति। यथा—

- प्रयत्नेन एव महाभारतयुद्धे पाण्डवाः जयं प्राप्तवन्तः।
- अस्माकं भारतदेशः प्रयत्नेन एव परतन्त्रतापाशात् मुक्तः।
- प्रयत्नेन एव जनाः उत्तुङ्गपर्वतेषु अपि आरोहणं कुर्वन्ति।
- प्रयत्नेन एव छात्रः परीक्षायाम् अधिकान् अङ्कान् प्राप्नोति।
- अतः अस्माभिः पुनःपुनः प्रयत्नः विधेयः। प्रयत्नेन जनाः किं-किं कुर्वन्ति अद्य वयं पाठे पठामः